শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱৎশঠকোপ শ্রীশ্রীনিৱাস যতীন্দ্র মহাদেশিকৈরনুগৃহীতং

॥ নৱনারসিংহ মঙ্গলাশাসনম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ নৱনারসিংহ মঙ্গলাশাসনম্ ॥

শ্রীপরাঙ্কুশযোগীন্দ্র শঠারিপ্রমুখান্ গুরূন্।
মঙ্গলাশাসনপরান্ মহিতাননিশং ভজে॥ **1**॥

জগজ্জন্মাদিলীলায জগদানন্দহেতরে।
জগচ্চক্ষুর্নিৱাসায শ্রীনৃসিংহায মঙ্গলম্॥ **2**॥

হিরণ্যস্তম্ভসংভূতিপ্রখ্যাত পরমাত্মনে।
প্রহ্লাদার্তিমুষে জ্ৱালানারসিংহায মঙ্গলম্॥ **3**॥

গুরুডাদ্রিগুহাগেহে গজকুণ্ডসরস্তটে।
হিরণ্যস্থাণ্ৱহংকারহারি সিংহায মঙ্গলম্॥ **4**॥

ৱারিজাৱারিত ভযৈঃ ৱাণীপতিমুখৈস্সুরৈঃ।
মহিতায মহোদার মালোলাযাস্তু মঙ্গলম্॥ **5**॥

ৱরাহকুণ্ডে মেদিন্যে ৱরাহার্থপ্রদাযিনে।
দন্তলগ্ন হিরণ্যাক্ষ দংষ্ট্র সিংহায মঙ্গলম্॥ **6**॥

গোভূহিরণ্যনির্ৱিণ্ন গোভিলজ্ঞানদাযিনে।
প্রভঞ্জন শুনাসীর রঞ্জকাযাস্তু মঙ্গলম্॥ **7**॥

ভার্গৱাখ্য তপস্বীশ ভাৱনা ভাৱিতাত্মনে।
অক্ষয্য তীর তীরস্থ ভার্গৱাযাস্তু মঙ্গলম্॥ **8**॥

চতুরানন চেতোব্জ চিত্রভানুস্বরূপিণে।
ৱেদাদ্রি গহ্ৱরস্থায যোগানন্দায মঙ্গলম্॥ **9**॥

হাহাহূহ্ৱাখ্য গন্ধর্ৱনৃত্ত গীত হৃতাত্মনে।
ভৱহন্তৃতটচ্ছত্রৱট সিংহায মঙ্গলম্॥ **10**॥

ভারদ্বাজমহাযোগি মহাপাতক হারিণে।
তাপনীয রহস্যার্থ পাৱনাযাস্তু মঙ্গলম্॥ **11**॥

শ্রীশঠারি যতীন্দ্রাদি যোগিহৃৎপদ্ম ভানৱে।
সর্ৱত্র পরিপূর্ণাযাহোবিলেশায মঙ্গলম্॥ **12**॥

মঙ্গলাশাসনমিদং মানিৱাস মুনীরিতম্।
মহনীযং পঠন্ শৃণ্ৱন্ মঙ্গলাযতনং ভৱেৎ॥ **13**॥

॥ ইতি নৱনারসিংহ মঙ্গলাশাসনং সমাপ্তম্॥